संस्कृतवार्ता:
15.11.2024
सायम् - 06:20

<u>मुख्यवार्ताः</u>

- प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य जमुय्यां जनजातीयगौरवदिवसस्य अवसरे षड्शतोत्तरषत्सहस्रकोटितोप्यधिकरुप्यकाणां विभिन्नानां विकासपरियोजनानां लोकार्पणं शिलान्यासं च विहितम्।
- झारखण्डे द्वितीयचरणाय महाराष्ट्रे च नैर्वाचनिकप्रचाराभियानं सजवं प्रवर्तते ।
- S&P Global इत्यनेन भारतस्य सकलराष्ट्रिय-उत्पादप्रतिशततायां सप्तविंशत्युत्तरद्विसहस्रवर्षं यावत् आगामिषु वित्तवर्षेषु प्रतिवर्षं ६.५ तः ७ प्रतिशतं वृद्धिः भविष्यति इति अनुमानितम् अस्ति।
- गुरुनानकजयन्त्युत्सवः गुरुपूरब् इति पर्व आदेशे धार्मिकोत्साहेन परिपाल्यते ।
- श्रीलङ्कादेशस्य सत्ताधारि राष्ट्रियजनशक्तिदलं (NPP) इति निर्वाचने विजयं प्राप्तवत्।
- अद्य सायं जोहान्सबर्गे वाण्डरर्स्-इति क्रीडाङ्गणे भारत-दक्षिण-आफ्रिका-देशयोः मध्ये चतुर्थान्तिमं च विंशतिः प्रति विंशतिः स्पर्धा भविष्यति।

<u>प्रधानमन्त्री-बिहार</u>

प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य जमुय्यां जनजातीयगौरवदिवसस्य अवसरे षड्शतोत्तरषत्सहस्रकोटितोप्यधिकरुप्यकाणां विभिन्नानां विकासपरियोजनानां लोकार्पणं शिलान्यासं च विहितम्। अस्मिन् अवसरे तेनोक्तं यत् एतासां परियोजनानाम् उदेश्यं जनजातीयसमुदायानाम् उत्थानं ग्राम्यजीवनस्तरे च औन्नत्यम् अस्ति

<u>झारखण्ड-प्रचार:</u>

झारखण्डे द्वितीयचरणाय महाराष्ट्रे च नैर्वाचनिकप्रचाराभियानं सजवं प्रवर्तते । प्रमुखदलानां शीर्षनेतारः मतदानात् प्राक् मतदातॄन् स्वपक्षे मतदानं कर्तुं दृढान् प्रयत्नान् कुर्वन्तः वर्तन्ते। धनबादस्य टुण्डीनगरे नैर्वाचनिकसभां सम्बोधयन् भाजपादलस्य वरिष्ठनेता तथाच केन्द्रीयो मन्त्री राजनाथसिंहः राज्ये प्रचण्डभ्रष्टाचाराय झारखण्डमुक्तिमोर्चादलस्य मुख्यमन्त्रिणः हेमन्तसोरेनस्य आलोचनां कृतवान्। भाजपा-वरिष्ठनेतारः शिवराजसिंहचौहानः, हिमन्तविश्वसर्मा, चम्पाई सोरेनः च डुमका-पाकुर-जामा-नगरेषु सभाः सम्बोधितवन्तः । गोड्डानगरे जनसभायां काङ्ग्रेसदलस्य वरिष्ठनेता राहुलगान्धी प्रतिज्ञां कृतवान् यत् यदि

I.N.D.I.A घटबन्धनं सत्तां प्राप्स्यति तर्हि दलद्वारा कृताः सर्वाः प्रतिज्ञाः पूर्णाः भविष्यन्ति। इतरथा देवघरे सभायां राजददलस्य वरिष्ठनेता तेजस्वीप्रसादयादवः उक्तवान् यत् भाजपादलं धार्मिकजातिपङ्क्तौ समाजस्य विभाजनं करोति। अजसु-पक्षस्य वामपक्षीयदलानां च नेतारः अपि सक्रियरूपेण प्रचारं कुर्वन्ति, राज्यस्य विभिन्नेषु भागेषु सभाः, रोडशो च कुर्वन्ति । द्वितीयचरणे झारखण्डे अस्मिन् मासे २० दिनाङ्के अष्टत्रिशद् आसनानां कृते मतदानं भविष्यति।

## S&P ग्लोबल्

S&P ग्लोबल इत्यनेन भारतस्य सकलराष्ट्रिय-उत्पादप्रतिशततायां सप्त विंशत्युत्तर द्विसहस्र वर्षं यावत् आगामिषु वित्तवर्षेषु प्रतिवर्षं ६.५ तः ७ प्रतिशतं वृद्धिः भविष्यति इति अनुमानितम् अस्ति। एस एण्ड पी ग्लोबल रेटिंग्स् इत्यनेन नवीनतमप्रतिवेदने उक्तं यत्, संरचनात्मकपरिष्काराः उत्तमाः आर्थिकाश्च सम्भावनाः भारतस्य वित्तीयसंस्थानां तन्यतायाः समर्थनं करिष्यन्ति। संस्थया स्वस्य वैश्विकवित्तकोषदृष्टिकोणप्रतिवेदने प्रकाशितं यत् महर्घतावृद्ध्या सह सशक्त वित्त कोष द्रव्य वर्धनेन सह ऋणदानम् अपि वर्धनीयम्।

## गुरुनानकजयन्त्युत्सवः

गुरुनानकजयन्त्युत्सवः गुरुपूरब् इति पर्व आदेशे धार्मिकोत्साहेन परिपाल्यते।

समग्रे देशे विश्वस्मिन् च गुरुनानकजयन्त्युत्सवः गुरुपूरब् इति पर्व आदेशे धार्मिकोत्साहेन परिपाल्यते । दिवसोयं प्रथमस्य सिक्खगुरोः गुरुनानकदेवस्य प्राकट्योत्सवत्वेन आमन्यते। यः सिक्खधर्मस्य स्थापनां कृतवान् । अस्मिन् वर्षे श्रीगुरुनानकदेवस्य पञ्चपञ्चाशदुत्तरपञ्चशततमा जन्मजयन्ती भक्तैः परिपाल्यते। सम्पूर्णे विश्वस्मिन् अस्मिन् दिने सिक्खभक्ताः प्रातःकाले शोभायात्राभिः दिवसस्य आरम्भं कुर्वन्ति, गुरुद्वारा इत्येतेषु प्रार्थनाः आयोज्यन्ते। सामुदायिकपाकशालाः, गुरुनानकस्य समानता, सेवा, करुणा चेति शिक्षाणां अभिव्यक्तिरूपेण सहस्रशो जनानां कृते भोजनस्य व्यवस्थां कुर्वन्ति। पंजाबप्रदेशे अमृतसरस्य श्री हरिमन्दिरसाहब इत्यस्मिन् तथा च राज्यस्य अन्येषु गुरुद्वारा इत्येतेषु शतशो भक्ताः प्रार्थनानमस्कारान् कुर्वन्ति। अस्मिन् अवसरे राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च जनान् अभिनन्दितवन्तः। अयं दिवसः कार्तिकपूर्णिमा इति पर्वत्वेन अपि आचर्यते। दिने अस्मिन् नैके भक्ताः श्रद्धालवः पवित्रनदीषु स्नानं कुर्वन्ति।

## श्रीलङ्कादेश:

श्रीलङ्कादेशस्य सत्ताधारि राष्ट्रियजनशक्तिदलं (NPP) इति निर्वाचने विजयं प्राप्तवत्। पञ्चविंशत्त्युत्तरद्विशत- सदस्यीयनिर्वाचने बहुमतस्य अङ्कं पारं कृत्वा दलेन अनेन वैजयन्ती सम्प्राप्ता। अद्यावधि एकोनाशीत्त्युत्तरैकशतासनानां कृते घोषितपरिणामानां मध्ये वामपक्षीयसङ्घटनेन एकचत्वारिंशदुत्तरैकशतम् आसनानि विजितानि सन्ति । अन्येषां कृते मतगणना अधुना अपि प्रर्तते। साजिथप्रेमदासस्य नेतृत्वे मुख्यविपक्षेण अद्यावधि पञ्चत्रिंशद् आसनानि विजितानि। इलङ्काई तमिल अरसु कड्चीदलेन सप्त आसनानि विजितानि ।

## प्रधानमंत्री-बोडोलैंड महोत्सव:

प्रधानमन्त्री नरेन्द्र मोदी अद्य सायंकाले नवीदिल्लीनगरे प्रथमस्य बोडोलैण्डमहोत्सवस्य उद्घाटनं करिष्यति। द्विदिवसीयः अयं महोत्सवः शान्तिं स्थापयितुं, बोडो-समाजस्य निर्माणार्थं च भाषा-साहित्य-संस्कृतेः च विषये एकः महत्-कार्यक्रमः अस्ति। प्रधानमन्त्रिकार्यालयेन विज्ञप्तौ उक्तं यत् महोत्सवस्य उद्देश्यं न केवलं बोडोलैण्ड्-प्रदेशे अपितु असमस्य अन्येषु भागेषु, पश्चिमबङ्गस्य, नेपालस्य, पूर्वोत्तरस्य अन्येषु अन्ताराष्ट्रियसीमाक्षेत्रेषु च निवसतः आदिवानः बोडोजनान् एकीकृत्य संस्थापनं वर्तते। महोत्सवस्य विषयः 'समृद्धभारतस्य शान्तिः सौहार्दं च' इति ।

## प्रधानः हैदराबादम्

केन्द्रीयः शिक्षामन्त्री धर्मेन्द्रप्रधानेन अद्य छात्राणां कृते शून्यत्रुटिप्रवेशपरीक्षाव्यवस्थायाः सर्वकारस्य प्रतिबद्धतायाः पुनः पुष्टिः कृता। दक्षिणे तेलङ्गानाराज्ये हैदराबादनगरे इण्डियनस्कूल आफ् बिजनेस (ISB) इत्यनेन आयोजितस्य द्वितीयस्य अन्वेषणमञ्चस्य पार्श्वे वार्ताहरैः सह संवादे प्रधानमहोदयः अवदत् यत्, डॉ. राधाकृष्णसमित्या अनुशंसितस्य बहु-आयामी परिष्काराः सम्प्रति सन्ति वीक्षाधीनाः। सः अवदत् यत्, ISB इत्यादिभिः संस्थाभिः कृतं शोधकार्यं सार्वजनिकनीतिनिर्माणे सहायकं भविष्यति तथा च विभिन्नस्तरेषु शासनस्य सहायतां करिष्यति। ततः पूर्वं मन्त्री आईएसबी परिसरे वार्षिकसंशोधनप्रदर्शनस्य ISB Insights Forum इत्यस्य द्वितीयसंस्करणस्य उद्घाटनं कृतवान्।

अमितशाह-बिरसा मुण्डा:

केन्द्रीयः गृहमन्त्री अमितशाहः अद्य नवदिल्लीनगरस्य बान्सेरापार्क् इत्यस्मिन् स्थाने भगवतः बिरसामुण्डा इत्यस्य प्रतिमायाः अनावरणं कृतवान्, यत्र हि महतः स्वतन्त्रतासेनानिनः सम्मानं कृतम्। आयोजने श्रीशाहः उक्तवान् यत् भगवान् बिरसा मुण्डा राष्ट्राय स्वकीयम् अपारं योगदानं कृतवान्। सः एवमपि अवदत् यत् बिरसा मुण्डा इत्यनेन आदिवासीसमुदायेषु जलस्य, भूमेः, वनानां च महत्त्वस्य विषये जागरूकता उत्पादिता। गृहमन्त्री उक्तवान् यत् नरेन्द्रमोदीसर्वकारः आदिवासीक्षेत्राणां विकासाय आदिवासीजनानाम् उत्थानाय च विशेषरीत्या कार्यं कुर्वन् अस्ति।

महा-गुजरात- ईडी

प्रवर्तननिदेशालयेन ह्यः सम्पूर्णे महाराष्ट्रे गुजराते च षोडशतः अपि अधिकेषु स्थानेषु अन्वेषणं कृतम्, यत्र प्रायः नवतिकोटिरूप्यकाणां संशितिपूर्णस्य वित्तव्यवहारस्य अन्वेषणं कृतम्, यत् कथितं यत् मालेगांव-नगरस्य व्यापारिणा दुरुपयोगितबैङ्कखातानां माध्यमेन कृतम् एजन्सीस्रोतानां अनुसारं छापेमारीषु एजन्सी इत्यनेन द्वयोः संवीक्षितबैङ्कखातयोः धारितानि प्रायः १.८ कोटिरूप्यकाणि स्थगितानि। अन्वेषकाः व्यवहारानां लाभार्थीनां प्रयोजनानां च अन्वेषणार्थं हवाला-सञ्चालकानां भूमिकायाः परीक्षणं कुर्वन्ति ।

क्रिकेट्

अद्य सायं जोहान्सबर्गे वाण्डरर्स्-इति क्रीडाङ्गणे भारत-दक्षिण-आफ्रिका-देशयोः मध्ये चतुर्थान्तिमं च विंशतिः प्रति विंशतिः स्पर्धा भविष्यति। सम्प्रति भारतीय दलं द्वे-एकम् इत्यंकांतरालेन श्रृङ्खलायां अग्रे अस्ति। प्रथमे द्वन्द्वे भारतेन दक्षिणाफ्रिका दलं एकषष्ठिः धावनांकैः पराजितम् आसीत्।

।।इति वार्ता:।।